# Shri Ganesha Stotram Sadevarshirdakshakritam

# સદેવર્ષિર્દક્ષકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Sadevarshirdakshakritam

File name : gaNeshastotramsadevarShirdakShakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM navamaH khaNDaH | adhyAyaH 17 | 9.17 26-41||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

June 4, 2024

*sanskritdocuments.org*

# સદેવર્ષિર્દક્ષકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
સદેવર્ષિર્દક્ષ ઉવાચ ।
નમસ્તે ગણેશાય સર્વાત્મને તે સદા ભક્તિમોહેન મોહાત્મકાય ।
મહેશાદિદેવૈઃ શુકાદ્યૈઃ સ્તુતાય હ્યયોગાય સંયોગધારિન્નમસ્તે ॥ ૨૬॥
ગજાનનાય વૈ તુભ્યં નમઃ પરશુપાણયે ।
ગદાધરાય શઙ્ખં વૈ ધારિણે તે નમો નમઃ ॥ ૨૭॥
વિઘ્નેશાય પરેશાય મહાવિઘ્નવિદારિણે ।
અનાથાય સનાથાય હેરમ્બાય નમો નમઃ ॥ ૨૮॥
નમો નમસ્તેઽસ્તુ મહોદરાય સ્વભક્તસંરક્ષણતત્પરાય ।
અભક્તકામાન્ વિનિહન્તૃકાય સદા સુશાન્તિપ્રદ તે નમો વૈ ॥ ૨૯॥
બ્રહ્મેશાય નમસ્તુભ્યં સદા સ્વાનન્દવાસિને ।
સિદ્ધિબુદ્ધિવરાયૈવ મૂષકધ્વજિને નમઃ ॥ ૩૦॥
દૈત્યમસ્તકધારાય દિતિપુત્રાય તે નમઃ ।
કણ્ઠાધો દેવકાયાય નમો સુરસુરાય તે ॥ ૩૧॥
યોગાય સર્વાત્મકસર્વપૂજ્ય માયાવિનાં મોહકરાય તુભ્યમ્ ।
માયાપ્રચાલાય સુસિદ્ધિદાય ધર્મસ્થપાલાય તુ શૂલપાણે ॥ ૩૨॥
અનન્તલીલયા નાથ સ્વયં ખેલસિ માયયા ।
તત્ર કિં વર્ણયામ્યેવાઽતો બ્રવીમિ નમો નમઃ ॥ ૩૩॥
સદા યોગસ્વરૂપાય ભક્તિભાવપ્રદાય તે ।
ભક્તિપ્રિયાય પૂર્ણાય ભક્તવત્સલ તે નમઃ ॥ ૩૪॥
પ્રસીદ પાહિ વિઘ્નેશ દાસં તે ભક્તિલાલસમ્ ।
માં મુદ્ગલસ્ય શિષ્યં વૈ ભક્તરાજસ્ય માનદ ॥ ૩૫॥
એવમુક્ત્વા ગણેશાનં પ્રણનામ પ્રજાપતિઃ ।
અનુ તં દેવવિપ્રાદ્યાઃ પ્રણેમુસ્તં પરાત્પરમ્ ॥ ૩૬॥
તમુત્થાપ્ય ગણાધીશો જગાદ વચ ઉત્તમમ્ ।

દક્ષં મુદ્ગલમાલોક્ય સ્વભક્તં ભક્તપાલકઃ ॥ ૩૭॥
(ફલશ્રુતિઃ ।)
શ્રીગણેશ ઉવાચ ।
વરાન્ વૃણુ પ્રજાનાથ દાસ્યે તે તુષ્ટિમાગતઃ ।
શ્રવણેન પુરાણસ્ય સ્તોત્રેણ મનસીપ્સિતાન્ ॥ ૩૮॥
ત્વયા કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૩૯॥
બ્રહ્મપ્રદં સુશાન્તેશ્ચ દાયકં ભક્તિવર્ધનમ્ ।
ભવિષ્યતિ મહાપ્રાજ્ઞ પરં મત્પ્રીતિવર્ધનમ્ ॥ ૪૦॥
ગણેશવચનં શ્રુત્વા દક્ષો હર્ષસમન્વિતઃ ।
પ્રણમ્ય તં જગાદાઽથ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૪૧॥

ઇતિ સદેવર્ષિર્દક્ષકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં નવમઃ ખણ્ડઃ । અધ્યાયઃ ૧૭ । ૯.૧૭ ૨૬-૪૧॥

- .. mudgalapurANaM navamaH khaNDaH . adhyAyaH 17 . 9.17 26-41..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stotram Sadevarshirdakshakritam*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*